संस्कृतवार्ताः

10/08/2025

सायम् : - 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमन्त्री नरेन्द्रमोदी अद्य बंगलुरु नगरे तिसृणां वन्देभारत-रेलसेवानां शुभारम्भम् अकरोत्। सममेव बंगलुरु नगरे मैट्रो सेवायाः येलो लाइन इत्यस्य तृतीयचरणम् अपि उद्घाटयत्।

· सेना प्रमुखः जनरल उपेन्द्र-द्विवेदी अवोचत् यत् सिन्दूराभियाने सैन्य त्रयस्य प्रमुखा: आवश्यक-निर्णायिक कार्यचरणे साहमत्यं प्रकटितवन्त:।

· जम्मूकश्मीरस्य किश्तवाड़-जनपदस्य डल-क्षेत्रे अद्य प्रात: सुरक्षाबलानाम् आतङ्कवादिनां च मध्ये सङ्घर्ष: प्रवर्तते।

· भारतीय ऋतु विभागेन आगामि सप्तदिनेषु उत्तरखण्ड-हिमाचलयो प्रबल वृष्टेः सञ्चेतना प्रकाशिता।

· तमिलनाडौ महाबलीपुरम इत्यत्र एशिया सर्फिंग चैंपियनशिप इति स्पर्धायाम् ओपन पुरूष श्रेण्यां भारतस्य रमेश बुढियालः कांस्य पदकं विजितवान्।

<u>प्रधानमन्त्री-कर्णाटक</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य बंगलुरु नगरे यातायात-सञ्चारं समेधितुम् नैकासां परियोजनानाम् आधारशिलां स्थापितवान्। बंगलुरु नगरम् उपेत्य श्रीमोदिना बंगलुरु-वेलागवी मध्ये वन्देभारत-रेलसेवा आरब्धा। अमुना वीडियो दृश्याङ्कन- माध्यमेन अमृतसर-कटरा, नागपुर-पुणे इत्यनयो: रेलमार्गयः अपि आरम्भो विहितः। वन्देभारत-रेल-यानानि विश्वस्तरीय सौविध्यपूर्णानि विद्यन्ते। तत: परं प्रधानमन्त्री बंगलुरु मेट्रो सेवाया: येलो लाइन सेवाम् अपि आरब्धवान्। बंगलुरु-वेलागवी मार्ग: उत्तर-कर्णटकं राजधान्या सह योजयति। ।

अत्रावसरे प्रधानमन्त्रिणा नरेन्द्रमोदिना देशवासिनां सक्रिय-सहयोगेन सप्त चत्वारितशत् उत्तर-द्वि-सहस्रतम-वर्षं यावत् भारतं विकसितं विधातुं प्रशासनस्य मन्तव्यम् अपि स्पष्टीकृतम्। अद्य बंगलुरु नगरे नम्मा मेट्रो सेवाया: तृतीयचरणस्य उद्घाटनानन्तरं तेन उक्तं यत् प्रशासनेन विकासं

प्रति भारतस्य यात्रायै: मानका: स्थापिता:। अमुना उक्तं यत् एषा यात्रा चतुर्दशोत्तर द्विसहस्रतमे वर्षे आरब्धा यदा भारतं विश्वस्य दशम: अर्थव्यवस्था अवर्तत। परम् इदानीं भारतं जगत: पञ्चम अर्थव्यवस्था वर्तते। द्रुतगत्या समेधमानं च वर्तते।

<u>राजनाथ सिंह:</u>

रक्षामंत्रिणा राजनाथसिंहेन अद्य मध्यप्रदेशे अष्टादश-शत-कोटि रूप्यकाणां बी.ई.एम.एल. रेल हब निर्माण परियोजनाया: आधारशिला स्थापिता। रेलकोच निर्माणस्य ब्रह्मा नामकस्य अस्य संयन्त्रस्य स्थापना रायसेन जनपदस्य उमरिया ग्रामे षष्टि: हेक्टेयर परिमितौ भूमौ भविष्यति। अनेन पञ्चसहस्राधिकेभ्य: जनेभ्य: आजीविका प्राप्ते: आशा वर्तते। अस्मिन् संयन्त्रे वन्देभारत, अमृतभारत, मेट्रो प्रभृति रेलयानानां शाटिका: निर्मास्यन्ते। अत्रावसरे रक्षामन्त्री राजनाथसिंह: अवोचत् यत् संयत्रस्य नाम ब्रह्मा इति भारतीय परम्परया स्वीकृत:।

<u>इसरो</u>

इसरो प्रमुख: डॉ. वी. नारायणन् अवोचत् यत् भारतीय अन्तरिक्षविज्ञान प्रौद्योगिकी संस्थानेन विगतेषु वर्षेषु भारतीय-प्रौद्योगिकी जगति महत्वपूर्ण-प्रतिभा युता: जना: प्रेषिता:। केरलस्य तिरुअनन्तपुरम् क्षेत्रे वलियमला इत्यत्र संस्थानस्य त्रयोदशे दीक्षान्त-महोत्सवे वीडियो संदेशे इसरो प्रमुख: अवोचत् यत् भारतं जगति द्रुतगत्या समेधमान अर्थव्यवस्था वर्तते। अस्याम् उपलब्ध्याम् इसरो अपि महत्वपूर्णं योगदानं प्रददाति।

<u>रक्षा-प्रमुख:</u>

रक्षा-प्रमुख जनरल अनिल चौहानः अवादीत् यत् ऑपरेशन-सिंदूर-इति अभियानं तिस्तृणां सेनानां मध्ये समन्वयनस्य प्रतीकं वर्तते। जनरल चौहान: सिकन्दराबादे कालेज-ऑफ-डिफेंस-मैनेमेंट इत्यत्र वरिष्ठ-अधिकारि-जनान् सम्बोधयित्वा सशस्त्र-सेनासु एकीकरणो रणनीतिक-दृष्टिकोणं सहकृतवान्। तेन भविष्यार्थं संयुक्त अभियानानां प्रारुपस्य अपि उल्लेखः कृतः।

## सेना प्रमुख:

सेना प्रमुखः जनरल उपेन्द्र-द्विवेदी सिन्दूराभियानं रणनीतिकदृष्ट्या महत्तवपूर्णं प्रतिपादयत्। अमुना उक्तं यत. इदम् अभियानं सैन्य सटीकतायाः राजनीतिक-स्पष्टतायाः च समन्वयनम् अवर्तत। गतदिने आई.आई.टी मद्रास इत्यत्र छात्रान् शिक्षकान् च सम्बोधयन् तेनोक्तं यत् सैन्य त्रयस्य प्रमुखाः आवश्यक-निर्णायक कार्यचरणे साहमत्यं प्रकटितवन्तः। सममेव सैन्य-प्रमुखेण उक्तं यत् सैन्यबलैः एतादृशी राजनीतिकदिशा स्पष्टता च प्रथमवारम् दृष्टा।

## सर्वोच्च न्यायालय:

सर्वोच्चन्यायालयस्य मुख्य-न्यायाधीशेन बी.आर.गवई-वर्येण प्रोक्तम् यत् न्यायपालिका-कार्यपालिका-विधायिका च देशस्य अंतिमं नागरिकं प्रति न्याय-प्रदानार्थम् अस्तित्वे सन्ति। तेन प्रोक्तम् यत् न्यायः शीघ्रातिशीघ्रं न्यूनतम-मूल्ये च भवेत्। न्यायमूर्तिः गवई-वर्यः अद्य गुवाहट्याम् उच्च-न्यायालयस्य नाहारलागुन-स्थले-स्थायी-पीठस्य नव-निर्मित-न्यायालय-भवनस्य उद्घाटनान्तरं सभां संबोधयति स्म।

## जम्मू-कश्मीर सङ्घर्ष:

जम्मूकश्मीरस्य किश्तवाड़-जनपदस्य डल-क्षेत्रे अद्य प्रातः सुरक्षाबलानाम् आतङ्कवादिनां च मध्ये सङ्घर्षः आरब्धः। अस्माकं संवाद-दात्रा सूचितं यत् क्षेत्रे आतङ्कवादिनां सूचनां गोप्यसूत्रैः प्राप्ता। तत्र द्वयोः पक्षयोः मध्ये अनवरतं गोलिकावर्षणं प्रवर्तते। विस्तृत विवरणस्य प्रतीक्षा वर्तते।

## माडविया

युवा कार्यक्रम क्रीडा मन्त्री मनसुख मांडविया अद्य अवोचत् यत् संडे ऑन साइकिल पदक्षेपेन फिट इंडिया अभियानं बृहत् आन्दोलनत्वेन परिवर्तितुं साहाय्यं प्रदत्तम्। तेन राष्ट्रिय-राजधान्यां संडे ऑन साइकिल फिट इंडिया कार्यक्रमे भाग-ग्रहणे एतत् उक्तम्। अद्य सम्पूर्ण-देशे पञ्चसहस्राधिक-ग्रामेषु पञ्चायत प्रतिनिधिभिः संडे ऑन साइकलिंग विधाय फिट इंडिया इत्यस्य संदेशः प्रदत्तः।

ऋतु सञ्चेतना

भारतीय ऋतु विभागेन आगामि-षट्-सप्त दिनेषु उपहिमालीय-पश्चिम-बङ्गाले असमे सिक्किमे बिहारे मेघालये अरूणांचलप्रदेशे च प्रबल वृष्टे: सञ्चेतना प्रकाशित। उत्तरखण्ड-हिमाचलयो: अपि समाना स्थिति: आगामि सप्तदिनेषु भविष्यति इत्यपि ऋतु विभागेन सञ्चेतितम्। ऋतु विभागस्य अनुसारेण अद्य देशस्य उत्तरमध्यभागे हरियाणा चण्डीगढ दिल्ली पञ्जाब उत्तरप्रदेश पश्चिममध्यप्रदेशेषु प्रबल-वर्षा भविंतु शक्यते। इयमेव स्थिति: आंध्रप्रदेशस्य तटीयक्षेत्रे तमिलनाडु पुदुचेरी कराइकल-तेलङ्गाना नगालैण्ड मणिपुर त्रिपुरायां अपि द्रष्टुं शक्यते।

सर्फिंग-स्पर्धा

तमिलनाडौ महाबलीपुरम इत्यत्र एशिया सर्फिंग चैंपियनशिप इति स्पर्धायाम् ओपन पुरूष श्रेण्यां भारतस्य रमेश बुढियालः कांस्य पदकं विजितवान्। असौ प्रथमो भारतीयः संवृत्तः येन अस्यां स्पर्धायां पदकं विजितम्। स्पर्धायां कोरियायाः कानोवा हीजेई स्वर्ण पदकम् इंडोनेशियायाः पजार अरियाना इत्यसौ च रजत पदकं प्राप्तवन्तौ।

।। इति वार्ता ।।